# साम्प्रतिके साहित्ये कोषशास्त्रस्य स्थाननिर्धारणम्

बिपिन कुमार झा

कूटशब्दाः- [कोषः, संस्कृतम्, साहित्यम्, अन्तर्जालम्, मानवीयवाग्व्यवहारः, अमरकोषः]

शोधसारः-

[आदिकालदेवाद्यावधि शब्दानां महत्वं सुविदितमेववर्तते। मानवीयवाग्व्यवहारस्याधारशिलारूपः शब्दः कालान्तरेषु विविधशास्त्राणामाधारः सञ्जातः। एततस्य महत्वमङ्गीकुर्वन्तः मनीषिणः पृथक् शास्त्ररूपे एव एतस्यान्विर्तिं विधाय कोषशास्त्रस्य परिपाटी समारब्धवन्तः। विविधेषुकालेषु विविधरूपे कोषग्रन्थान् प्रणीय साम्प्रतिके काले इह विश्वनीडे अन्तर्जालं सम्प्रयुज्य संस्कृत-वर्ड-नेट, अमरकोषज्ञानसरणिः सदृशकोषानामभिकल्पनं कृतवन्तः विद्वंसः। अस्तु एवं प्रतीयते यत् दिनानुदिनं कोषशास्त्रस्य महत्वं विद्वद्भिः अङ्गीकृतमेव। कोषशास्त्रस्याध्ययनं बिना मानवीयबुद्धिविपाको न दृश्यते का कथा सङ्गणकानाम्। अस्तु आवश्यकता अस्ति नितरां कोशशास्त्रस्य नानाविधरूपे श्रीवर्धनस्येति शम्।]

सस्कृतवाङ्मयस्य प्रकल्पमिव कोषशास्त्रमपि अन्यतमस्थानं भजते। वैदिककालादारभ्याद्यावधि कोषग्रन्थानां प्रणयनम् एतस्य प्रमाणरूपे आकलितुं शक्यते। प्रारम्भिकावस्थायां तु कोशग्रन्थानां प्रणयनम् उद्देश्यविशेषमभिलक्ष्य कृतवन्तः कोषकाराः[1]। जनसामान्यस्य शब्दज्ञानपिपासाऽपि कोशग्रन्थानां सुमधुरश्रोतस्विनीव पिपासाशान्त्यर्थं सार्थक्यनिर्धारणं करोति।

शब्दः वस्तुतः नित्यः। महाभाष्यकारः निगदति- महान् हि शब्दप्रयोगविषयः। सप्तद्वीपा वसुमती। त्रयोलोकाः। चत्वारो वेदाः । सांगाः सरहस्याः वहुधा विभिन्नाः

---

[1] रसिकेश पृ.17

एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधावाह्वृच्यं, नवधाथर्वणो वेदः, वाकोवाक्यम्, इतिहासः, पुराणम्, वैद्यकम्- इत्येतावान् शब्दस्यप्रयोगविषयः।[2]'

एतद्विज्ञायापि प्राचीनाः विद्वांसः शब्दानां विवेचनार्थं कोषनिर्माणार्थं चिन्तनं कृतवन्तः यतो हि शब्दानां प्रतिपद्-पाठः न सम्भवति। एतन्निगदितुमेव भाष्यकारः ऊचुः-

'एवं हि श्रूयते। बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्च अध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न अन्तं जगाम। किं पुनरद्यत्वे? यः सर्वथा चिरं जीवति स वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति आगमनकालेन, प्रवचनकालेन, व्यवहारकालेन इति।[3]'

अत एव व्यावहारिकदृशाशब्दसमाकलनस्य परम्परा आरब्धा। सब्दसंग्रहस्य परिपाटिकृते कोषपदं रूढः सञ्जातः। वैदिककाले निघण्टुः प्रचलितः कोषः समागतः यत्र नामाख्यातानां संग्रहो दृश्यते। तत्रैव लौकिककोषेषु समान्यतया नामपदानामेवान्वितिर्दृश्यते। क्वचित् परिशिष्टप्रभागे अव्ययार्थानां समाकलनमपि सम्प्राप्यते। प्रारम्भिकावस्थायां लौकिककोषस्तु पद्यबन्धरूपे सन्दृश्यते यथा हि नामलिङ्गानुशासनं नाममरकोषः। अस्तु पद्यबन्धस्य लाभः अपि साक्षात् दृक्पथि आयाति। काव्यशिक्षोत्सुकाः विमलमतयः बालास्तु सहजतया एव तत्तत्कोशग्रन्थानङ्गीकर्तुं पारयन्ति। प्राचीनकाले अर्थदृशा कोषस्य विभाजनं प्रकारद्वयेन कृतं वर्तते-

- समानार्थककोषाः
- नानार्थककोषाः

---

2 महाभाष्यपश्पशाह्निकम्।

3 तत्रैव

A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 18th , Vol – V,. Page-116-120 ISSN 976-8645

वैदिककालादारभ्य साम्प्रतिकं यावत् ये प्रतिनिधिकोषाः सन्ति तेषां परिगणमत्र कर्तुं शक्यते।

| क्रम संख्या | कोषः | कोषकारः |
|---|---|---|
| 1 | अनुक्रमणिका[4] | XXX |
| 2 | आख्यातनामानुक्रमणी[5] | माधव |
| 3 | परिभाषांकसूत्र[6] | |
| 4 | त्वताद्यनुक्रमणिका | |
| 5 | निघण्टुः[7] | यास्क/अन्य |
| 6 | निरुक्तम्[8] | यास्क |
| 7 | वररुचिकोशः[9] | वररुचि |
| 8 | शब्दार्णवः[10] | |
| 9 | अमरकोशः[11] | अमरसिंहः |
| 10 | नाममाला | धनञ्जय |
| 11 | वैजयन्ती कोशः[12] | यदवप्रकाशः |
| 12 | अभिधानचिन्तामणिः[13] | हेमचन्द्रः |
| 13 | विश्वप्रकाशकोशः | महेश्वरः |
| 14 | अभिधानमुक्तामाला | श्रीधरसेनः |
| 15 | अनेकार्थसमुच्चयकोशः | शाश्वतः |
| 16 | नानार्थसंग्रहः | अजयपालः |
| 17 | धरणिकोशः | धरणिदासः |

[4] सत्यपाल पृ. 5
[5] तत्रैव
[6] तत्रैव पृ. 6
[7] तत्रैव पृ. 8
[8] तत्रैव पृ. 14
[9] तत्रैव पृ. 24
[10] तत्रैव पृ. 26
[11] अमरकोशः, विश्वनाथ झा
[12] तत्रैव पृ. 83
[13] तत्रैव पृ. 110

A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 18th , Vol – V,. Page-116-120 ISSN 976-8645

| | | |
|---|---|---|
| 18 | अनेकार्थकोशः | मङ्खः |
| 19 | मेदिनीकोशः[14] | मेदिनीकारः |
| 20 | अव्ययकोशः | महादेवः |
| 21 | उणादिनाममाला | शुभशीलगणिः |
| 22 | व्याकरणपरिभाषाकोशः | लक्ष्मीनारयणव्यासः |
| 23 | अन्तर्जालमुपयुज्य निर्मिताः कोषाः, विश्लेषकाः[15] | |

वर्तमान काले तु कोषनिर्माणप्रक्रिया इतोपि प्रवला सञ्जाता किन्तु अत्र निर्माणपरिपाटी कदाचित् भिन्ना वर्तते खलु। यथा हि-

- प्रारम्भिके काले तु नामाख्यातानां सहैव संकलनं क्रियन्ते स्म कोषकाराः किन्तु कालान्तरे संज्ञानामेवान्वितिर्दृश्यते पुनश्च आख्यातपदानां कोषः अपि दृश्यते। प्रौढावस्थायां तु कोषस्य तत्र दृश्यते यत्र शास्त्रीयपदानां कोषनिर्माणप्रक्रिया आरब्धा। साम्प्रतिकेकाले अन्तर्जालाश्रित्य कोषनिर्माणं दृश्यते। सम्प्रतिके काले विश्लेषणं प्रधानं वर्तते खलु।
- दिनानुदिनं नूतनपदानां अन्वितिः कोशेषु प्राप्यते। अमरकोषे येषां पदानां प्रयोगो न दृश्यते तेषां सहस्रपदानां दर्शनमुत विवेचनं वैजयन्तीकोशे दृश्यते।यथा-स्वसू[16], जम्बूद्वीपः[17], मालवाः[18], शफरी[19], अग्निकण्डिका[20], कर्तनभाण्ड[21]। शब्दकपद्रुमस्तु विविधोद्धरणमपि प्रस्तौति।

---

[14] Aiyer p. 177
[15] www.sanskrit.jnu.ac.in
[16] **वैजयन्तीकोशः** 3.1.1-4
[17] **तत्रैव 3.1.10-19**
[18] **तत्रैव** 3.1.40
[19] **तत्रैव 3.3.94**
[20] **तत्रैव 3.6.14**
[21] **तत्रैव 3.9.117**

उक्तविवरणं स्पष्टीकरोति यत् सम्प्रतिके युगे कोषस्यविनिर्माणं न केवलं शब्दानामर्थावगमार्थं क्रियते अपितु सहित्यस्यसमृद्ध्यर्थमुत विविधनूतनप्रकल्पे प्रयोगार्थं समाजे दृग्गोचरीभूतानां नूतनपदानामङ्गीकरणार्थं कोषकारैः क्रियते।

सन्दर्भग्रन्थाः


- रसिकेश, डा. रनसरूप, आदर्श हिन्दी-संस्कृत-कोश, चौखम्बा विद्याभवन, वाराणसी, 2007
- Aiyar, T.K. Ramachandra, A short Hostory of Sanskrit Liturature, R.S. Vadhayar & Sons, Palghat, 2002
- नारंग, सत्यपाल, संस्कृतकोश-शास्त्र के विविध आयाम, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, 1998
- झा, डा. विश्वनाथ, अमरकोश, मोतीलाल बनारसीदास, वाराणसी, 2008